# Navagrah Stotram

# નવગ્રહસ્તોત્રમ્

## Document Information

Text title : Navagraha Sutram 5

File name : navagrahastotram.itx

Category : navagraha

Location : doc_z_misc_navagraha

Transliterated by : Mohan Chettoor

Proofread by : Mohan Chettoor, Narayanaswami Pallasena

Latest update : June 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 9, 2023

*sanskritdocuments.org*

# નવગ્રહસ્તોત્રમ્

વેદૈર્જ્યોતિર્મયત્વે જગતિ પરિણમદ્ભિસ્સદાત્મપ્રસૂતૈ-
   ર્દ્ધ્વાન્તં નિર્મૂલયદ્ભિર્બુધવરહૃદયે બોધભાવં દધાનૈઃ ।
ત્રૈલોક્યં ભાસયન્તં રવિમખિલસુરૈઃ સ્તૂયમાનપ્રભાવં
   મૃત્યુગ્રસ્તાત્મનાં નો હૃદયરુગગદઙ્કારમાદ્યં પ્રપદ્યે ॥ ૧॥

પુંસામુદ્દામજન્માન્તરસુકૃતપરીપાકયોગૈકલભ્ય-
   સ્સમ્પદ્વિદ્યાયુરોજાંસિ વિમલકિરણો યત્કટાક્ષઃ કરોતિ ।
સારસ્સર્વગ્રહાણામનિમિષસદસા સ્વાદનીયસ્વરૂપઃ
   સોમસ્ત્રાણાય નસ્તાદુતિતરમહિમા રોહિણીપ્રાણનાથઃ ॥ ૨॥

સત્વં યસ્ય પ્રસાદાદ્ભવતિ તનુભૃતમપ્રકમ્પ્યં વિપદ્ભિઃ
   સ્ફૂર્જદ્વૈરિપ્રપઞ્ચત્રુટનપટુતરપ્રક્રમો વિક્રમશ્ચ ।
ચિત્રાકલ્પપ્રદીપાકૃતિરતિસુકુમારઃ કુમારો ધરણ્યાઃ
   નિત્યાનન્દાય ભૂયાદુરુદુરિતવનાઙ્ગારકોઽઙ્ગારકો નઃ ॥ ૩॥

વેદે શાસ્ત્રે પુરાણે ચતુરતરકલાનાં કલાપે ચ દાક્ષ્યં
   પુંસાં વક્ત્રોક્તિચાટુપ્રહસનરસિકત્વઞ્ચ યસ્સન્તનોતિ ।
સર્વજ્ઞઃ શર્વવામેક્ષણજનિરમરારાધિતશ્રીમદઙ્ઘ્રિઃ
   શ્રીમાન્ નિશ્રેયસાય પ્રભવતુ વિશદાગાધબોધો બુધો નઃ ॥ ૪॥

પ્રત્યક્ષીભૂતલોકત્રયવિમલદૃગાલોકિતાશેષમૂર્તિ -
   ર્નીતિપ્રાકારસંરક્ષીતરિપુપરિષદ્દુર્ગમસ્વર્ગમાર્ગઃ ।
ભદ્રં દદ્યાત્ ગ્રહાણામુરુતરમહસામગ્રણી રાસરાગૈ-
   ર્યોગીન્દ્રૈસ્સેવ્યમાનઃ સુરગુરુરમરાધીશ્વરાણાં ગુરુર્નઃ ॥ ૫॥

તુષ્ટે યસ્મિન્ સમસ્તાસુરનિકરગુરૌ નીતિશાસ્ત્રપ્રવીણે
   લોકોઽયં સત્કલત્રાદ્યખિલસુખસમૃદ્ધિં પ્રયાતીક્ષણેન ।
રુષ્ટેતત્ પ્રત્યવાયં વ્રજતિ ચ સતતં નન્દ્યમાનપ્રવૃત્તિઃ
   પાયાદ્દુષ્કર્મભૂભૃત્કુલદલનકલાભાર્ગવો ભાર્ગવો નઃ ॥ ૬॥

ચણ્ડશ્ચણ્ડીશખણ્ડદ્યુતિરમિતજટાજૂટતુઙ્ગોત્તમાઙ્ગો
    દ્રાઘીયશ્મશ્રુજાલોજ્જ્વલમુખકમલો મઙ્ગલઃ પિઙ્ગલાક્ષઃ ।
ચણ્ડાંશોરંશજન્મા કૃશતનુરતિશૂરશ્શનૈઃ સઞ્ચરિષ્ણુઃ
    બ્રહ્મણ્યઃ ક્રૂરકર્મા મમ શનિરશનૈઃ શ્રેયસે બોભવીતુ ॥ ૭॥

વિષ્ણોર્વિશ્વેશ્વરસ્યાસુરકુલવિમતવ્રાતકલ્પાન્તવહ્ને-
    શ્ચક્રં યત્કણ્ઠનાલાદસુરસમુપયાતિં ન વૈયાત્યમાપ ।
યસ્યૈતૌ પુષ્પવન્તાવભિનવકબલિભાવમાદ્યં દધાનૌ
    ભદ્રં નઃ સૈંહિકેયો ગ્રહગણગણનાસુ પ્રતીપપ્રયાણઃ ॥ ૮॥

બ્રહ્મણ્યાઃ કમલોદ્ભવસ્ય તનયા નિર્દ્ધૂતવૈશ્વાનર-
    જ્જ્વાલાજાલસહોદરોરુમહસઃ સર્વગ્રહાગ્રેસરાઃ ।
આનન્દોદયહેતવો રિપુકુલપ્રોત્સાદજીવાતવો
    દુઃખૈકાર્ણવસેતવઃ પ્રણમતાં તે કેતવઃ પાન્તુ નઃ ॥ ૯॥

ઇતિ નવગ્રહસ્તોત્રં સમ્પૂર્ણમ્ ।
શ્રી નવગ્રહેભ્યો નમઃ ॥

Encoded by Mohan Chettoor

Proofread by Mohan Chettoor, Narayanaswami Pallasena

*Navagrah Stotram*

pdf was typeset on June 9, 2023

Please send corrections to *sanskrit@cheerful.com*